# संस्कृत वार्ता:

दिनाङ्क : 13/03/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-राज्यस्य कोकराझार-मण्डले आभासीय-माध्यमेन जनसभां सम्बोधयन् गुवाहाटी-नगरे सप्तत्यधिक पंचशतोत्तर चत्वारिसहस्र कोटि रूप्याकाणां विभिन्नानां विकास-परियोजनानां भूमि-पूजनम्, उद्घाटनं, राष्ट्राय समर्पणं च विहितम् ।
- डा. एस्. जयशङ्करः अद्य लोकसभायां अवदत् यत् हिन्दमहासागरे भारतस्य हितानां रक्षणार्थं सर्वकारः समुचितान् उपायान् कुर्वन् अस्ति।
- पाकिस्तान-सेनया अफगानिस्तान प्रांतेषु कृत नूतनेषु आक्रमणेषु महिलानां बालकानां च मृत्युः अभवत् ।
- भारत-ऋतु-विभागेन श्वः अरुणाचलप्रदेशे, असम्-राज्ये, मेघालये च प्रचण्डवृष्टेः पूर्वानुमानं कृतम्।
- सात्विक सांईराज रकीरेड्डी चिराग शेट्टी इत्येतयो: भारतीय बैडमिंटन पुरुष युगलम् अद्य बासेल इत्यत्र प्रागुपान्त्य चक्रीय क्रीडायां डेनमार्कस्य ख्रिस्टियान-क्येआ रासमस-क्येआ च सम्मुखीकरष्यिति ।

---------------------------------------------

असम यात्रा

केन्द्रस्य भाजपा-नेतृत्वस्य एन्. डी. ए-सर्वकारः बोडो-प्रादेशिक-परिषद्-क्षेत्रस्य सर्वांगीण-विकासाय कार्यं कुर्वन् अस्ति, तस्य द्रुत-विकासाय पञ्चदश-शत-कोटिरूप्यकाणि स्वीकृतानि इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् । असम-राज्यस्य कोकराझार-मण्डले आभासीय-माध्यमेन जनसभां सम्बोधयन् गुवाहाटी-नगरे सः एतत् उक्तवान् ।

प्रधानमन्त्री अधोरेखितवान् यत्, दशकान् यावत् हिंसायाः रक्तपातस्य च अनुभवः प्राप्तः बोडो-प्रदेशः, वृद्धेः स्थिरतायाः च नूतने युगे प्रविष्टवान्, सहस्रशः युवकाः मुख्यधारायां सम्मिलयितुं स्वशस्त्राणि समर्पितवन्तः इति ।

बोडोलैण्ड-क्षेत्रस्य दीर्घकालिक उपेक्षायाः विषये काङ्ग्रेस-दलस्य निन्दां कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् भाजपा-नेतृत्वे एन्. डी. ए-सर्वकारः अस्य क्षेत्रस्य सर्वांगीणविकासाय कार्यं कुर्वन् अस्ति । गुवाहटी-नगरे प्रधानमन्त्री अशीत्यधिक षट्शतोत्तर ऊनविंशतिसहस्र कोटि रूप्याकाणां विभिन्नानां विकास-परियोजनानां भूमि-पूजनम्, उद्घाटनं, राष्ट्राय समर्पणं च करिष्यति ।

---------------------------------------------

## हिन्दमहासागरक्षेत्र

अद्य सर्वकारः अवदत् यत् हिन्दमहासागरक्षेत्रे सर्वाणि विकासकार्याणि, ये भारतस्य सुरक्षायाः आर्थिकहितेषु च प्रभावं कुर्वन्ति, तेषां निरीक्षणं निकटतया प्रचलति । विदेशमन्त्री डा. एस्. जयशङ्करः अद्य लोकसभायां एकस्य प्रश्नस्य प्रत्युत्तरे अवदत् यत् हिन्दमहासागरे भारतस्य हितानां रक्षणार्थं सर्वकारः समुचितान् उपायान् कुर्वन् अस्ति । सः अवदत् यत् हिन्दमहासागरप्रदेशेन सह अन्यैः देशैः सह भारतस्य सम्बन्धाः स्वयमेव स्वतन्त्राः सन्ति, तृतीयेन देशेन सह सम्बन्धा: च भिन्नाः सन्ति ।

---------------------------------------------

## तालिबान

तालिबानस्य प्रवक्ता जबीहुल्लाह मुजाहिदः उक्तवान् यत् पाकिस्तान-देशः काबुल्, कन्धार, पक्तिया, पक्तिका इत्यादिषु अनेकेषु अफ़गान-प्रान्तेषु नूतनानि सैन्य-आक्रमणानि कृतानि, यस्य परिणामेन महिलाः बालकान् च समेत्य नागरिकानां क्षतिः अभवत् । एतैः आक्रमणैः अफगानिस्तान्-पाकिस्तान्-सीमायां द्वन्द्वः वर्धितः, तालिबान् इत्यनेन आक्रमणानि अफगान-नेतृत्वस्य उल्लंघनम् इति वर्णितम् । पूर्वतनानां आक्रमणानां अपराधानां च

क्रमं अनुवर्तयन् पाकिस्तानस्य सेनया पुनः एकदा अफगानिस्तान्-देशे विस्फोटं कृतम् । केषुचित् स्थानेषु नागरिकानां गृहेषु अस्य प्रभावः अभवत्, येन महिलानां बालकानां च मृत्युः अभवत् ।

-----------------------------------------------

## अश्विनी वैष्णवः

रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् भारतीय-रेल-विभागेन प्राय: सप्तसप्ततिः प्रतिशतं यावत् समयबद्धताया: लक्ष्यं प्राप्तम् अस्ति, येषु चतुर्विंशति क्षेत्रीय रेल-विभागै: नवतिः प्रतिशतोप्यधिकं समयपालनम् अभिलिखितम् ।

राज्यसभायां प्रश्नोत्तरकाले प्रत्युत्तरं प्रददन् श्रीवैष्णवः अवदत् यत् नियतसमयसीमायां रेलयानानाम् आगमनस्य प्रतिशतस्य आधारेण समयबद्धताया: मापनं भवति ।

सः संसूचितवान् यत् रेल-विभागेन स्वस्य बृहज्जालस्य कार्यक्षमतां वर्धयितुं अनेकाः कार्यनीतयः स्वीकृताः सन्ति ।

सः अवदत् यत् सूचना-प्रौद्योगिकी-आधारिता प्रणाली कृत्रिमबुद्धिमत्ता आधारितं विश्लेषणम्, रेलमार्गाणां उन्नयनम् इत्यादीनि उन्नत-प्रौद्योगिकी-साधनानि रेलयानानां समयसूच्यां विद्यमानानां संरचनात्मक-समस्यानां समाधानं कुर्वन्ति ।

मन्त्रिणा स्वीकृतं यत् यद्यपि वर्तमान-समयबद्धता फ्रान्स्, जर्मनी, इटली इत्यादिभिः देशैः सह तुलनीया अस्ति, तथापि भारतेन जपानदेशस्य अपेक्षया स्वकीयं मानकं स्थापयितुम् प्रयत्नं करणीयम् ।

-----------------------------------------------

## वस्त्रोद्योगमन्त्री गिरिराजसिंहः

वस्त्रोद्योगमन्त्री गिरिराजसिंहः अवदत् यत् 'वोकल् फॉर लोकल्' 'आत्मनिर्भरभारत' इत्येताभ्यां भावनाभ्यां देशस्य हस्ततन्तुक्षेत्रं सुदृढी-कृतम्, तथा च एतत् देशस्य अद्वितीयस्य परिचयस्य प्रतिनिधित्वं करोति ।

अद्य राज्यसभायां अनुपूरकप्रश्नानां उत्तरं प्रददन् श्रीसिंहः अवदत् यत् श्रीनरेन्द्रमोदिनः नेतृत्वे पंचदशोत्तर द्विसहस्रतमे वर्षे प्रथमवारं 'राष्ट्रीय-हस्ततन्तु-दिवसस्य' उत्सव: आचरित: ।

-----------------------------------------------

## ऋतु-विभागेन

भारतीय-ऋतु-विभागेन (आई. एम्. डी.) इत्यनेन श्वः अरुणाचलप्रदेशे, असम्-राज्ये, मेघालये च प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। छत्तीसगढ, विदर्भ, पञ्जाब, उपहिमालयी-पश्चिमवङ्ग-राज्यं, सिक्किम, उत्तराखण्ड इत्येतेषु प्रदेशेषु अपि मेघगर्जनेन विद्युद्योतनेन च सह तीव्रवायोः ऋतु-विभागेन पूर्वानुमानं प्रकटितम्। आई. एम. डी. इत्यस्यानुसारं, श्वः मध्यप्रदेशे, अरुणाचलप्रदेशे, असम-राज्ये, मेघालये, मराठवाडायां, नागालैण्ड-राज्ये, मणिपुरे, मिजोरम-राज्ये, त्रिपुरायां, राजस्थाने चापि एतादृशी स्थिति भविष्यति। अत्रान्तरे, हिमाचलप्रदेशे, कोङ्कणे, गोवाराज्ये च उष्णतरङ्गस्य स्थितिः अपेक्षितम् अस्ति, यत्र गुजरात्-प्रदेशे उष्ण-आर्द्र-ऋतोः स्थितिः प्रचलिष्यति।

-----------------------------------------------

## बैडमिन्टन स्पर्धा

सात्विक सांईराज रकीरेड्डी चिराग शेट्टी इत्येतयो: भारतीय बैडमिंटन पुरुष युगलम् अद्य बासेल इत्यत्र षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य **स्विस ओपन सुपर 300** स्पर्धाया: प्रागुपान्त्य चक्रीय क्रीडायां डेनमार्कस्य ख्रिस्टियान-क्येआ  रासमस-क्येआ च सम्मुखीकरिष्यिति ।

।। इति वार्ता: ।।